# Svarashastra Parichayah

# સ્વરશાસ્ત્ર પરિચયઃ

## Document Information

Text title : Svarashastra Parichayah

File name : svarashAstraparichayaH.itx

Category : misc, article

Location : doc_z_misc_general

Author : nAgendra pANDey

Proofread by : Meera Iyer

Description/comments : from Sarasvati Sushma 37, Vol. 1-4

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# સ્વરશાસ્ત્ર પરિચયઃ

સ્વરવ્યઞ્જનેતિ ભેદેન વર્ણાનાં દ્વૌ વિભેદૌ । તત્રાકારાદિ વર્ણા સ્વરનામ્ના પ્રસિદ્ધાઃ સન્તિ, યે માહેશ્વરસૂત્રસ્ય “અચિ” પ્રત્યાહારે સમાગચ્છન્તિ । વ્યઞ્જનાનિ તુ કાદિ વર્ણાઃ સન્તિ, માહેશ્વરસૂત્રાણાં “હલ્” પ્રત્યાહારે ગણ્યન્તે । અત્ર યે સ્વરાઃ સન્તિ, તેષાં વિષયે પ્રાચીનભારતીયજ્યૌતિષ એકઃ સ્વતન્ત્રો વિષયઃ સ્વરશાસ્ત્રમિતિ નામ્ના સુપ્રસિદ્ધઃ । તત્ર સ્વરવર્ણને ષોડશસ્વરાણાં વર્ણનં વિદ્યતે સ્વરશાસ્ત્રેષુ ।
યથા નરપતિજયચર્યાયાં (૧) – (૧. નરપતિજયચર્યા - ૨.૨ ।)
માતૃકાયાં પુરા પ્રોક્તાઃ સ્વરાઃ ષોડશસઙ્ખ્યયા ।
અ આ ઇ ઈ ઉ ઊ ઋ ૠ ઌ ૡ એ ઐ ઓ ઔ અં અઃ ॥

તત્ર અં અઃ ઇતિ અન્તિમૌ દ્વૌ સ્વરૌ ત્યાજ્યૌ ભવતઃ, તથા ચત્વાર ઋ ૠ ઌ ૡ ઇમે સ્વરા નપુંસકાઃ કથ્યન્તે (૨) । (૨. “ઋ ૠ ઌ ૡ નપુંસકો” - નરપતિજયચર્યા - ૨.૨ ।) અત એવ ષોડશભિરિમે ષડ્ રહિતાઃ સ્વરાઃ ક્રિયન્તે, તદાઽવશિષ્ટા દશસઙ્ખ્યાકાઃ સ્વરા ભવન્તિ । પુનરત્ર પઞ્ચ હ્રસ્વાઃ, પઞ્ચ ચ દીર્ઘસ્વરાઃ સન્તિ । હ્રસ્વસ્વરા યે પઞ્ચપરિમિતાઃ, ત એવ સ્વરશાસ્ત્રે ગૃહ્યન્તે । તે “અ ઇ ઉ એ ઓ” ઇતિ સન્તિ । ઇમ એવ પઞ્ચ સ્વરાઃ સ્વરશાસ્ત્રે પ્રચલિતા ભવન્તિ (૩) । (૩. જ્ઞેયાસ્તત્ર સ્વરા આદ્યાઃ-હ્રસ્વાઃ (અ ઇ ઉ એ ઓ) પઞ્ચ સ્વરોદયે નરપતિજયચર્યા - ૨.૩ ।)

એતેષાં સ્વરાણામાધારભૂતેન સ્વરશાસ્ત્રેણ કાલત્રયસ્ય સર્વવિધં જ્ઞાનં કર્તું શક્યતે । સ્વરશાસ્ત્રવિજ્ઞસ્ય દૈવજ્ઞસ્ય સાહાય્યેન કોઽપિ જનો દુઃસાધ્યમપિ કાર્યં સારલ્યેન કર્તું શક્નોતિ, તથા દુર્બલોઽપિ રાજા સબલં શત્રું જેતું સમર્થો ભવતિ । યથા સ્વરશાસ્ત્રસ્ય મહત્ત્વવર્ણનપ્રસઙ્ગેષુ ઇમા ઉક્તયઃ સન્તિ–
લાભાલાભં સુખં દુઃખં જીવિતં મરણં તથા ।
જયઃ પરાજયશ્ચેતિ સર્વં જ્ઞેયં સ્વરોદયે ॥

યસ્યૈકોઽપિ ગૃહે નાસ્તિ સ્વરશાસ્ત્રસ્ય પારગઃ ।
રમ્ભાસ્તમ્ભોપમં રાજ્યં નિશ્ચિતં તસ્ય ભૂપતેઃ ॥

સ્વરશાસ્ત્રે સદાભ્યાસી સત્યવાદી જિતેન્દ્રિયઃ ।
તસ્યાદેશસ્ય યઃ કર્તા જયશ્રીસ્તં નૃપં ભજેત્ ॥

દશૈકેન શતં તૈશ્ચ સહસ્રં શતસઙ્ખ્યયા ।
સ્વરોદયબલીરાજા દશઘ્નં હન્તિ લીલયા ॥

પુષ્પૈરપિ ન યોદ્ધવ્યં યાવદ્ધીનસ્વરોદયઃ ।
સ્વરોદયબલે પ્રાપ્તે યોદ્ધવ્યં શસ્ત્રકોટિભિઃ (૧) । (૧. નરપતિજયચર્યા - ૨.૧૧; ૧.૧૧-૧૪ ।)
સ્વરે વેદાશ્ચ શાસ્ત્રાણિ સ્વરે ગાન્ધર્વમુત્તમમ્ ।
સ્વરે ચ સર્વત્રૈલોક્યં સ્વરમાત્મસ્વરૂપકમ્ ॥

સ્વરહીનશ્ચ દૈવજ્ઞો નાથહીનં યથા ગૃહમ્ ।
શાસ્ત્રહીનં યથા વક્ત્રં શિરોહીનં ચ યદ્વપુઃ ॥

બ્રહ્માણ્ડખણ્ડપિણ્ડાદ્યાઃ સ્વરેણૈવ હિ નિર્મિતાઃ ।
સૃષ્ટિસંહારકર્ત્તા ચ સ્વરઃ સાક્ષાન્મહેશ્વરઃ ॥

સ્વરજ્ઞાનાત્પરં ગુહ્યં સ્વરજ્ઞાનાત્પરં ધનમ્ ।
સ્વરજ્ઞાનાત્પરં જ્ઞાનં ન વા દૃષ્ટં ન વા શ્રુતમ્ ॥

શત્રું હન્યાત્સ્વરબલે તથા મિત્રસમાગમઃ ।
લક્ષ્મીપ્રાપ્તિઃ સ્વરબલે કીર્તિઃ સ્વરબલે સુખમ્ ॥

સર્વશાસ્ત્રપુરાણાદિ સ્મૃતિવેદાઙ્ગપૂર્વકમ્ ।
સ્વરજ્ઞાનાત્પરં તત્ત્વં નાસ્તિ કિઞ્ચિદ્વરાનને ॥

ઇદં સ્વરોદયં શાસ્ત્રં સર્વશાસ્ત્રોત્તમોત્તમમ્ ।
આત્મઘટપ્રકાશાર્થં પ્રદીપકાલકોપમમ્ (૨) ॥

(૨. શિવસ્વરોદયે - ૧૬.૧૭.૨૦.૨૧.૨૨.૨૫.૨૭ ।)
સ્વરજ્ઞાનં નરે યત્ર લક્ષ્મીઃ પાદતલે ભવેત્ ।
સર્વત્ર ચ શરીરેઽપિ સુખં તસ્ય સદા ભવેત્ ॥

પ્રણવઃ સર્વવેદાનાં બ્રાહ્મણો ભાસ્કરો યથા ।
મૃત્યુલોકે તથા પૂજ્યઃ સ્વરજ્ઞાની પુમાનપિ (૩) ॥ (૩. શિવસ્વરોદયે-૩૮૯-૩૯૦ ।)

એતેષાં પઞ્ચ સ્વરાણાં ક્રમશઃ પઞ્ચ દેવતાઃ, પઞ્ચ કલાઃ, પઞ્ચ શક્તયઃ, પઞ્ચ ચક્રાણિ, પઞ્ચ મહાભૂતાનિ, પઞ્ચ વિષયાઃ પઞ્ચ સંજ્ઞાસ્તથા પઞ્ચાવસ્થા ભવન્તિ (૧) । (૧. અકારાદ્યાઃ સ્વરાઃ પઞ્ચ બ્રહ્માદ્યાઃ પઞ્ચ દેવતાઃ ।
નિવૃત્ત્યાદ્યાઃ કલાઃ પઞ્ચ ઇચ્છાદ્યાઃ શક્તિપઞ્ચકં ॥

માયાદ્યાશ્ચક્રભેદાશ્ચ ધરાદ્યં ભૂતપઞ્ચકં ।
શબ્દાદિવિષયાસ્તે ચ કામબાણા ઇતીરિતાઃ ॥ (નરપતિજયચર્યા – ૨.૬-૭) ) યથા ચક્રં –

——————————————————————————————

| અ | ઇ | ઉ | એ | ઓ | સ્વરાઃ |
|---|---|---|---|---|---|
| બ્રહ્મા | વિષ્ણુઃ | રુદ્રઃ | સૂર્યઃ | ચન્દ્રઃ | દેવતાઃ |
| નિવૃત્તિઃ | પ્રતિષ્ઠા | વિદ્યા | શાન્તિઃ | અતિશાન્તિઃ | કલાઃ |
| ઇચ્છા | જ્ઞાના | પ્રભા | શ્રદ્ધા | મેધા | શક્તિઃ |
| ચતુરસ્રઃ | અર્ધચન્દ્રઃ | ત્રિકોણમ્ | ષટ્કોણમ્ | વર્તુલઃ | ચક્રમ્ |
| ધરાઃ | જલમ્ | અગ્નિઃ | વાયુઃ | આકાશઃ | પઞ્ચભૂતમ્ |
| ગન્ધઃ | રસઃ | રૂપમ્ | સ્પર્શઃ | શબ્દઃ | વિષયઃ |
| પિણ્ડઃ | પદમ્ | રૂપમ્ | રુપાતીતઃ | નિરઞ્જનમ્ | સંજ્ઞાઃ |
| બાલઃ | કુમારઃ | યુવા | વૃદ્ધઃ | મૃતઃ | અવસ્થાઃ |

અસ્યોપયોગઃ –

કસ્યાપિ જનસ્ય નામાદ્યક્ષરં સ્વરતો વ્યઞ્જનતો વા પ્રારભ્યતે । યદિ સ્વરતઃ પ્રારભ્યતે, તદા કોષ્ઠકે તસ્ય સ્વરં જ્ઞાત્વા ચક્રાનુસારં દેવતાઃ, પઞ્ચભૂતવિષયચક્રાદિકં જ્ઞાતું શક્યતે । યદિ ચ નામાદ્યક્ષરે વ્યઞ્જનં સ્યાત્, તદા વ્યઞ્જને યો સ્વરઃ સંયુક્તઃ સ્યાત્, તસ્યૈવ વિચારઃ ક્રિયતે ।

યથોદાહરણમ્ –

મન્યતે કસ્યાપિ જનસ્ય નામ સિન્ધુર્વર્તતે । તસ્ય નામાદ્યક્ષરે “સિ” અક્ષરં તર્હિ સકારેઽત્ર ઇકારોઽસ્તિ । અત એવાસ્ય “ઇ” સ્વરઃ । ચક્રાનુસારં તસ્ય વિષ્ણુઃ દેવતા, પ્રતિષ્ઠાકલા, જ્ઞાનાશક્તિઃ, અર્ધચન્દ્રચક્રઃ, જલતત્ત્વમ્, રસવિષયઃ, પદસંજ્ઞા કુમારાવસ્થા ભવિષ્યતિ । અનેનદં જ્ઞાયતે યદયં સિન્ધુનામકો જનો વૈષ્ણવોઽસ્તિ । આપત્તૌ વિષ્ણુપૂજનેન લાભાન્વિતો ભવિષ્યતિ । કુમારાવસ્થાયાં સુખમવાપ્સ્યતિ । સદૈવ મનસિ કૌમારગુણં સ્થાસ્યતીતિ સર્વં નામાનુસારં ફલમવગમ્યતે । એવમેત્ર વિવિધપ્રકારકાણિ ચક્રાણિ નિર્મીયન્તે સ્વરવિચારે । યથા વર્ણસ્વરચક્રમ્, ગ્રહસ્વરચક્રમ્, જીવસ્વરચક્રમ્, રાશિસ્વરચક્રમ્, નક્ષત્રસ્વરચક્રમ્, પિણ્ડસ્વરચક્રમ્, યોગસ્વરચક્રમિત્યાદિ, તથૈવ દ્વાદશવાર્ષિકમ્, વાર્ષિકમયનમ્, ઋતુઃ, માસઃ, પક્ષઃ, દિનમ્, ઘટીત્યાદીનિ ચક્રાણિ ભવન્તિ, યેષાં પ્રયોગઃ પૃચ્છકસ્ય પ્રશ્નાનુસારં ફલજ્ઞાનાય ભવતિ ।

યૌગિકં સ્વરં -

યોગાભ્યાસબલેન પ્રાણાયામાદિવિધિના શ્વાસસ્ય પ્રવેશે નિર્ગમને ચ નિયન્ત્રણં કૃત્વા યો જનઃ સ્વરરહસ્યં વેત્તિ, સ યૌગિકસ્વરસાધનબલેન સર્વમપિ કાલિકં તથ્યમવગન્તું શક્નોતિ ।

યૌગિકં સ્વરં હંસચારમપિ કથ્યતે । શરીરમધ્યે વાયુસઞ્ચાર ઇડા-પિઙ્ગલાસુષુમ્નાભિસ્તિસૃભિર્નાડીભિર્ભવતિ (૧) । (૧. પ્રકટો વાયુસઞ્ચારો લક્ષ્યતે દેહમધ્યતઃ । ઇડા-પિઙ્ગલા- સુષુમ્નાભિર્નાડીભિસ્તિસૃભિર્બુધૈઃ ॥ (નરપતિજયચર્યા - ૩.૮) )

અત્રેડાનાડૌ ચન્દ્રઃ, પિઙ્ગલાયાં સૂર્યઃ, સુષુમ્નાયાં શમ્ભુર્ભવતિ । અયં શમ્ભુર્હંસસ્વરૂપો ભવતિ । શરીરે નાસિકા છિદ્રાભ્યાં સ્વરપ્રવેશે શકારસ્ય ધ્વનિર્જાયતે, નિર્ગમે ચ હકારસ્ય ધ્વનિર્જાયતે । અત એવ સ્વરસઞ્ચારસ્યાસ્ય વિધેર્નામ હંસચાર ઇત્યુચ્યતે (૨) । (૨. ઇડાનાડીસ્થિતશ્ચન્દ્રઃ પિઙ્ગલા ભાનુવાહિની । સુષુમ્ના શમ્ભુરૂપેણ શમ્ભુર્હંસસ્વરૂપકઃ ॥ (નરપતિજપચર્યા - ૩.૯) )

પ્રાણીનાં નાભૌ મહાશક્તિરૂપા કુણ્ડલિની સર્પાકારા વિદ્યતે । તસ્માદ્ નાભિસ્થાનાદ્ દશનાડ્ય ઊર્ધ્વં ગચ્છન્તિ । દ્વે દ્વે તિર્યઙ્ નાડ્યૌવર્તેતે । એવં ચતુર્વિંશતિ નાડ્યઃ સન્તિ । શરીરપોષિકાઃ સપ્તોત્તરાણિ સપ્તશતાનિ (૭૦૭) નાડ્યઃ સૂક્ષ્મરૂપિણ્યઃ સન્તિ । અત્ર પ્રધાના નાડ્યો દશ એવ । એતેષામિમાનિ નામાનિ સન્તિ - ૧. ઇડા, ૨. પિઙ્ગલા, ૩. સુષુમ્ના, ૪. ગાન્ધારી, ૫. હસ્તિજિહ્વિકા, ૬. પૂષા, ૭. યશા, ૮. વ્યૂષા, ૯. કુહૂઃ, ૧૦. શઙ્ખનિકા (૩) । (૩. ઇડા પિઙ્ગલા સુષુમ્ના ગાન્ધારી હસ્તિજિહ્વિકા । પૂષા યશા ચ વ્યૂષા ચ કુહૂઃ શાઙ્ખિનિકા તથા ॥ (નરપતિજયચર્યા -૩.૬) )

પ્રાય ઇદં તથ્યં દૃશ્યતે યત્ શ્વાસગ્રહણે વિસર્જને વા વામવિસર્જને નાસિકાછિદ્રેણાથવા દક્ષિણનાસિકાછિદ્રેણાર્થાદ્ એકેનાપિ નાસિકાછિદ્રેણ શ્વાસક્રિયા પ્રબલા ભવતિ । અન્યેન ચ મન્દતરા । યદા કદૈવ નાસિકાયાં છિદ્રાભ્યાં દ્વાભ્યાં સમાક્રિયા ભવતિ, યદા વામચ્છિદ્રેણ શ્વાસપ્રગ્રહણં વિસર્જનં વા ક્રિયતે, તદા વામનાડી ચન્દ્રસ્વરશ્ચ પ્રચલતિ, યદા ચ દક્ષિણનાસિકાછિદ્રેણ શ્વાસપ્રગ્રહણં વિસર્જનં વાધિકરૂપેણ ક્રિયતે, તદા દક્ષિણનાડી સૂર્યસ્વરશ્ચ પ્રચલતીતિ મન્યતે (૪) ।

(૪. (ક) ઇડાનાડીસ્થિતશ્ચન્દ્રઃ પિઙ્ગલા ભાનુવાહિની ।
સુષુમ્ના શમ્ભુરૂપેણ શમ્ભુર્હંસસ્વરૂપકઃ ॥ (નરપતિજયચર્યા - ૩.૯) (ખ)
ઇડાયાં તુ સ્થિતશ્ચન્દ્રઃ પિઙ્ગલાયાં ચ ભાસ્કરઃ ।
સુષુમ્ના શમ્ભુરૂપેણ શમ્ભુર્હંસસ્વરૂપતઃ ।(શિવસ્વરોદયે, શ્લોકઃ-૫૦) )

યદા દ્વાભ્યાં છિદ્રાભ્યાં સમાનરૂપેણ શ્વાસક્રિયા જાયતે, તદા મધ્યમાનાડી સુષુમ્નાગતા ભવતિ । યા દશ નાડ્યઃ પૂર્વં કથિતાઃ, તાષાં શરીરે સ્થાનાન્યેવં સન્તિ ।

વામે ઇડા, દક્ષિણે પિઙ્ગલા, મધ્યે સુષુમ્ના, વામચક્ષુષિ ગાન્ધારી, દક્ષિણે હસ્તિજિહ્વિકા, દક્ષિણકર્ણે પૂષા, વામકર્ણે યશસ્વિની, મુખે વ્યૂષા, લિઙ્ગે કુહુઃ, ગુદાસ્થાને શઙ્ખિની । એવમત્ર શરીરે નાડ્યસ્તિષ્ઠન્તિ ।

અત્ર તિસ્રો નાડ્ય ઇડા, પિઙ્ગલા, સુષુમ્ના, પ્રાણમાર્ગે સ્થિતાઃ કથ્યન્તે, ક્રમશઃ સર્વાસાં દશ નાડિકાનાં મધ્યે ઇમે વાયવસ્તિષ્ઠન્તિ (૧) (૧. શિવસ્વરોદયે-૩.૪૦।) , તદ્યથા –
૧. પ્રાણઃ, ૨. અપાનઃ, ૩. સમાનઃ, ૪. ઉદાનઃ, ૫. વ્યાનઃ, ૬. નાગઃ, ૭. કૂર્મઃ, ૮. કૃકલઃ, ૯. દેવદત્તઃ, ૧૦. ધનઞ્જયશ્ચઃ (૨) ।
(૨. પ્રાણોઽપાનઃ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।
નાગઃ કુર્મઃ કૃકલશ્ચૈવ દેવદત્તો ધનઞ્જયઃ ॥ (નરપતિજયચર્યા - અ૦ ૩૦.૭) ।)

અત્ર હૃદયે પ્રાણવાયુસ્તિષ્ઠતિ । ગુદાસ્થાને અપાનવાયુઃ, નાભિદેશે સમાનવાયુઃ, કણ્ઠમધ્યે ઉદાનવાયુઃ, સમ્પૂર્ણશરીરે વ્યાનનામકો વાયુસ્તિષ્ઠતિ।

પરન્તુ સ્વરશાસ્ત્રવિચારે પ્રધાનરૂપા ઇડાપિઙ્ગલાસુષુમ્નાખ્યાસ્તિસ્રો નાડ્યો
દક્ષિણ -વામ- મધ્યગતાઃ સૂર્ય-ચન્દ્ર- શિવાશ્રિતાઃ સન્તિ યાભિઃ ફલાદેશે પ્રયોજનં દૃશ્યતે । અસ્ય વિચારોઽગ્રે કરિષ્યતે ।

સ્વરફલમ્-
શુક્લપક્ષસ્ય પ્રતિપદાતઃ પ્રારભ્ય તૃતીયાતિથિં યાવચ્ચન્દ્રસ્વરશ્ચલતિ । તત્પશ્ચાત્ પુનઃ દિનત્રયં યાવદ્ અર્થાચ્ચતુર્થી - પઞ્ચમી - ષષ્ઠી તિથિષુ સૂર્યસ્વરશ્ચલતિ ।
એવમપિ તદગ્રે ત્રિષુ (૭,૮,૯) તિથિષુ ચન્દ્રસ્વરઃ પ્રચલતિ । એવમેવાગ્રેઽપિ ત્રિષુ તિથિષુ ક્રમશઃ સૂર્ય-ચન્દ્રસ્વરયોઃ ક્રમેણ સઞ્ચરણં જાયતે ।

અથ કૃષ્ણપક્ષસ્ય પ્રતિપદાતો તૃતીયાં યાવત્ સૂર્યસ્વરઃ પ્રચલતિ, પુનરગ્રે ત્રિષુ (૪,૫,૬) તિથિષુ ચન્દ્ર સ્વરઃ પ્રચલતિ । એવમગ્રે ત્રિષુ ત્રિષુ તિથિષ્વયં ક્રમઃ પ્રચલતિ । યથા ચ નરપતિજયચર્યાયામ્ –
આદૌ ચન્દ્રઃ સિતે પક્ષે ભાસ્કરસ્તુ સિતેતરે ।
પ્રતિપદાદિતો હાનિસ્ત્રીણિ ત્રીણિ ક્રમોદયઃ (૩) ॥ (૩. નરપ્રતિજયચર્યા -૩.૧૫ ।)
અસ્ય નરપતિજયચર્યાયાઃ સુબોધિનીટીકાયામસ્ય ભાવાર્થો ન સમ્યક્ પ્રકારેણ કૃતોઽસ્તિ । યતો હિ યસ્મિન્ કાલ એતી ચન્દ્રસૂર્યસ્વરૌ શુક્લ- કૃષ્ણપક્ષે વા પ્રચલિષ્યતસ્તદા અથવા યસ્મિન્ દિને તિથ્યારમ્ભો ભવિષ્યતિ, તસ્મિન્ દિને સૂર્યોદયકાલે યદિ મધ્યરાત્રૌ મધ્યદિવસે સાયંતને વા તિથ્યારમ્ભઃ સ્યાત્, તદા કલ્પ્યતે સ્વરસઞ્ચારે એકરૂપતા ન ભવિષ્યતિ । તથાઽગ્રે ફલાદેશકથનેઽપિ અનિયમિતતા સમ્ભવિષ્યતિ । તદ્યથા -
ચન્દ્રોદયે યદા સૂર્યશ્ચન્દ્રઃ સૂર્યોદયે યદા ।
અશુભં હાનિરુદ્વેગસ્તદ્દિને જાયતે ધ્રુવમ્ (૧) ॥ (૧. નરપતિજયચર્યા - ૩.૧૬;)
અતસ્તદ્દિને જાયતે ધ્રુવમિત્યનેન યદિ નિશિ તિથ્યારમ્ભઃ સ્યાત્, તથા દિનસ્ય
પરિભાષા કા ભવિષ્યતિ ? અત એવ મન્યતે સૂર્યોદયકાલિક્યેવ તિથિર્ગ્રાહ્યા । તથા હિ “યસ્ય દિનં તસ્યૈવ રાત્રિઃ” ઇતિ પરમ્પરયા સૂર્યોદયે યા તિથિર્ભવિષ્યતિ, તસ્યા એવ ગ્રહણમગ્રિમસૂર્યોદયાત્ પૂર્વં યાવત્ સ્વીકર્તવ્યં । તથા હિ પ્રાતઃ કાલે સૂર્યોદયસમયે સ્વરસ્ય વિચારઃ કર્ત્તવ્યઃ ।

પૂર્વોક્તં યચ્છુક્લપક્ષસ્ય પ્રતિપદાદિતસ્તુ ત્રિષુ ત્રિષુ તિથિષુ ચન્દ્રસૂર્યસ્વરૌ, (વામદક્ષિણસ્વરૌ) તથા કૃષ્ણપક્ષપ્રતિપદાદિતો ત્રિષુ ત્રિષુ તિથિષુ ક્રમશઃ સૂર્યચન્દ્રસ્વરૌ (દક્ષિણવામસ્વરૌ) પ્રચલતઃ । સામાન્યનિયમોઽયમ્ ।

યસ્ય જનસ્યૈવં ક્રમેણ સર્વાષુ તિથિષુ સ્વરસઞ્ચારો ભવતિ, તસ્ય કૃતે સર્વં ફલં શોભનં જાયતે ।

શુક્લપક્ષસ્ય પ્રથમાદ્યાસુ તિસૃષુ તિથિષુ ચન્દ્રસ્વરઃ, તત્પશ્ચાત્ ક્રમશઃ તિસૃષુ તિથિષુ સૂર્યચન્દ્રસ્વરૌ સ્યાતામ્ । તથૈવ કૃષ્ણપક્ષસ્ય પ્રથમાદ્યાષુ ત્રિસૃષુ તિથિષુ સૂર્યસ્વરઃ, તત્પશ્ચાત્ ક્રમશસ્તિસૃષુ, તિસૃષુ તિથિષુ ચન્દ્રસૂર્યસ્વરૌ સ્યાતામ્,

તદા શુભં સ્યાત્ । યદ્યેવં ન ભવતિ, અર્થાચ્ચન્દ્રસ્વરસ્ય સમયે સૂર્યસ્વરઃ પ્રચલિતો ભવેત્, તથા સૂર્યસ્વરસ્ય સમયે ચન્દ્રસ્વરઃ પ્રચલિતસ્તદા અશુભં જાયતે (૨) । (૨. તદેવ - ૩.૧૬)

અત્રાભ્યાસબલેન સિદ્ધઃ સાધકઃ પૂર્વવાર્ણિતનિર્દેશાનુસારં યથેચ્છં ચન્દ્રસૂર્યસ્વરયોઃ સઞ્ચાલનં કર્તું સમર્થો ભવિષ્યતિ । એકોઽયમપિ સામાન્યો નિયમો યદ્ રાત્રૌ ચન્દ્રસ્વરસ્ય સઞ્ચાલનમ્, દિવા સૂર્યસ્વરસ્ય સઞ્ચાલનં શ્રેયસ્કરં ભવતિ (૩) ।
(૩. શશાઙ્કં ચારયેદ્રાત્રૌ દિવાચાર્યો દિવાકરઃ ।
ઇત્યભ્યાસરતો નિત્યં સ યોગી નાત્ર સંશયઃ ॥ (નરપતિજયચર્યા - ૩.૧૭) )

કાર્યવશેન સ્વરસઞ્ચાલને ફલં
યાત્રા, વિવાહઃ, વસ્ત્રાલઙ્કારાદિભૂષણાદિધારણં શુભકર્મારમ્ભઃ સન્ધિવાર્તા,નવીનગૃહપ્રવેશઃ, હોમાદિકં શાન્તિકર્મ, રસાયનાદ્યૌષધિનિર્માણમ્, વિદ્યારમ્ભસ્તથા સ્થિરં કાર્યમપિ ચન્દ્રસ્વરે પ્રશસ્તં ભવતિ ।

સૂર્યસ્વરસ્ય સઞ્ચારકાલે વિગ્રહઃ યુદ્ધાદિકાર્યં, સ્નાનમ્, ભોજનમ્, મૈથુનમ્, વ્યવહારાદિકં પ્રશસ્તં સ્યાત્ । યદિ દૂરસ્થઃ શત્રુઃ સ્યાત્, તસ્યોપરિ વિજયં પ્રાપ્તું ચન્દ્રસ્વરે યુદ્ધારમ્ભો વિજયપ્રદો ભવતિ । યદા શત્રુરાસન્ન એવ સ્યાત્, તદા સૂર્યસ્વરે યુદ્ધે સતિ સાફલ્યં પ્રાપ્યતે ।

યાત્રાયાં વિશેષઃ
યાત્રા કાલે યદા વામસ્વરઃ સ્યાત્, તદા વામચરણં પ્રથમમગ્રે કૃત્વા યાત્રા ક્રિયતે । યદિ ચ દક્ષિણસ્વરઃ પ્રચલતિ તદા દક્ષિણપાદમગ્રે કૃત્વા યાત્રા પ્રારભ્યતે । એવં કૃતે સતિ યાત્રા સિદ્ધિપ્રદા ભવતિ । યદા વામસ્વરે યાત્રા ક્રિયતે, તદા પ્રથમં સમસઙ્ખ્યાકં યાવદ્ વામપાદં સઞ્ચાલ્યતે, દક્ષિણસ્વરે સતિ વિષમસઙ્ખ્યાકં યાવદ્ દક્ષિણપાદેન પ્રથમં યાત્રા પ્રારભ્યતે ।

યુદ્ધકાલે યદા ચન્દ્રસ્વરઃ સ્યાત્, તદા સ્થાયી જયતિ । યદા ચ સૂર્યસ્વરઃ પ્રવહતિ, તદા યાયી જયતિ । યદિ વામસ્વરસ્ય પ્રવાહઃ સ્યાત્, તદા સ્થાયી યોદ્ધા પૂર્વસ્યામુત્તરસ્યાં વા યુદ્ધં કૃત્વા વિજયી ભવતિ । દક્ષિણસ્વરપ્રવાહે યાયી યોદ્ધા પશ્ચિમસ્યાં દક્ષિણસ્યાં વા દિશિ યુદ્ધં કૃત્વા વિજયી ભવતિ । અયમપિ વિચારો યદ્ યદિ યુદ્ધકાલે વામસ્વરસ્ય પ્રવાહઃ સ્યાત્, તદા ચન્દ્રમસઃ સમ્મુખે વામે વા કૃત્વા યુદ્ધં કુર્યાત્ । યદા ચ સૂર્યસ્વરપ્રવાહઃ સ્યાત્, તદા સૂર્યં પૃષ્ઠે દક્ષિણે વા કૃત્વા યુદ્ધારમ્ભં કુર્યાત્, તદા વિજયો ભવતિ (૧) । (૧. દિગ્જ્ઞાનં સૂર્યચન્દ્રમારાશિવશેન ક્રિયતે । તથા ચ - મેષસિંહધનુરાશિ પૂર્વદિશા, વૃષકન્યામકરેષુ દક્ષિણ દિશા, મિથનતુલાકુમ્ભેષુ પશ્ચિમ દિશા, કર્કવૃશ્ચિકમીનેષુ ઉત્તરદિશા ભવતિ ।)

સ્વરવશેન રતિવિચારઃ, સન્તાનવિચારશ્ચ
રતિકાલે યદા સ્ત્રિયો વામસ્વરો ભવતિ, પુરુષસ્ય ચ દક્ષિણસ્વરો ભવતિ, તદા મકરધ્વજતુલ્યઃ પ્રસઙ્ગો જાયતે । અયમપિ સામાન્યો નિયમો યત્ પુરુષો વામપાર્શ્વેન શયનં કરોતિ, તદા તસ્ય દક્ષિણસ્વરઃ પ્રચલતિ । સ્ત્રી યદા દક્ષિણપાર્શ્વેન શયનં કરોતિ, તદા તસ્યા વામસ્વરઃ પ્રચલતીતિ વાયુનિયમઃ । તદ્યથા -
શયને વા પ્રસઙ્ગે વા યુવત્યાલિઙ્ગનેઽપિ વા ।

યઃ સૂર્યેણ પિબેચ્ચન્દ્રં સ ભવેન્મકરધ્વજઃ (૧) ॥ (૧. નરપતિજયચર્યા - ૩.૨૧ ।)

યદા શરીરે વિષસ્ય પ્રભાવઃ સ્યાત્, તસ્મિન્ સમયે યદિ અભ્યાસબલેન વામસ્વરસ્ય સઞ્ચાલનં ક્રિયતે, તદા તસ્ય પ્રભાવો વિનશ્યતિ । રતૌ સૂર્યસ્વરસ્ય સઞ્ચારેણ કામિની વશમાયાતિ । મોક્ષકાલે યદિ મધ્યમવાયોઃ (સુષુમ્નાયાઃ) સઞ્ચાલનં ક્રિયતે, તદા સારલ્યેન મોક્ષપ્રાપ્તિઃ સઞ્જાયતે(૨) ।
(૨. ચન્દ્રચારે વિષં હન્તિ સૂર્યે બાલાં વશં નયેત્ ।
સુષુમ્નાયાં ભવેન્મોક્ષ એકો દેવસ્ત્રિધા સ્થિતઃ ॥ (નરપતિજયચર્યા - ૩.૩૫) )

યદિ પૃચ્છકો ગર્ભપ્રશ્નં કરોતિ, તદા તસ્મિન્ કાલે પૂર્ણસ્વરોદયે પુત્રો ભવતિ । યદિ પ્રશ્નકાલે સ્વરસઞ્ચરણં નિર્બલં મન્દગત્યા ભવેત્, તદા કન્યા ભવતિ । યદા ચ પ્રશ્નકાલે શૂન્યસ્વરસ્ય પશ્ચાત્ પૂર્ણસ્વરઃ પ્રચલેત્, તદા પ્રાક્ કન્યા, પશ્ચાચ્ચ પુત્રો ભવતિ । યદા ચ સઙ્ક્રમણકાલઃ સ્યાત્, અર્થાત્ પૂર્ણ - સમ-શૂન્ય-સ્વરાણાં સહૈવ ચલનં ભવેત્, તદા ગર્ભપાતો ભવતિ ।

એવમેવ પ્રકારેણ ચન્દ્રસૂર્યસ્વરયોરભ્યાસેન વિવિધાનિ કાર્યાણિ ઇચ્છાનુસારેણ
કર્તું શક્યન્તે । યથોક્તમ્ -
ચન્દ્રસૂર્યસ્વરાભ્યાસં યે કુર્વન્તિ સદા નરાઃ ।
અતીતાનાગતં જ્ઞાનં તેષાં હસ્તગતં સદા (૩) ॥ (૩. તદેવ - ૩.૫૬;)

સ્વરશાસ્ત્રસ્ય પ્રણેતા
ઇદં સ્વરશાસ્ત્રં શિવપાર્વત્યોઃ સંવાદરૂપં શિવસ્વરોદયે વર્ણિતમસ્તિ । યથા શિવવાક્યં પાર્વતીં પ્રતિ -
ગુહ્યાદ્ગુહ્યતરં સારમુપકારપ્રકાશનમ્ ।
ઇદં સ્વરોદયં જ્ઞાનં જ્ઞાનાનાં સસ્તકં મણિઃ (૪) ॥ (૪. શિવસ્વરોદયે - શ્લો૦ ૧૧;)

સ્વરવિષયકં યૌગિકં જ્ઞાનં તન્ત્રશાસ્ત્રેઽપિ દૃશ્યતે । તત્રાપિ તન્ત્રશાસ્ત્રસ્યાધારભૂતો દેવઃ શિવ એવ । યથા નરપતિજયચર્યાયાં બ્રહ્મયામલનામકસ્ય તન્ત્રગ્રન્થસ્યોદ્ધરણમસ્તિ । તદ્યથા–
અથાતઃ સમ્પ્રવક્ષ્યામિ ખ્યાતા યે બ્રહ્મયામલે ।
માત્રાદિભેદભિન્નાનાં સ્વરાણાં ષોડશોદયાન્ (૫) ॥ (૫. નરપતિજયચર્યા - ૨.૧ ।)

સઙ્ગ્રામવિજયોદયેઽપીદં સ્વરશાસ્ત્રં શામ્ભવાદ્ નિઃસૃતં । યથા ચ - “સઙ્ક્ષેપાદ્ વક્ષ્યેઽહં સમરજયં શામ્ભવાત્ સારમ્ (૧) ઇતિ ” ॥ (૧. નરપતિજયચર્યા -૪ .૧ ।)

જૈનગ્રન્થેઽપિ સ્વરશાસ્ત્રસ્ય વિવેચનં વર્તતે । ભગવતો મહાવીરસ્ય ચતુર્દશ ઉત્તરાધિકારી ભદ્રબાહુઃ યોગાભ્યાસ-પ્રાણાયામબલેન સ્વરવિષયસ્યાભ્યાસં કૃતવાનિતિ જ્ઞાયતે । એતદ્ વિષયકં વર્ણનં “સ્વરજ્યોતિ” ગ્રન્થે શ્રીમતઃ સૂરિમહોદયસ્ય ગુરુશિષ્યવાર્તાલાપપ્રસઙ્ગેન જ્ઞાયતે ।

અનેનાયં વિજ્ઞાયતે યદ્ યોગાભ્યાસબલેન સ્વરસંસાધનં ભવતિ, યસ્ય પ્રવર્ત્તકો યોગિરાજશઙ્કર એવ સિદ્ધ્યતિ ।

સ્વરશાસ્ત્રાન્તર્ગતા બહવો વિષયાઃ સન્તિ । બહૂનિ ચ ચક્રાણિ ગ્રહનક્ષત્રાદિવશેન ભવન્તિ; પરન્તુ પ્રસ્તુતનિબન્ધે મુખ્યતશ્ચન્દ્રસૂર્યસ્વરયોઃ પરિચયસ્તસ્યોપયોગશ્ચ પ્રદર્શિતઃ। યતઃ સંક્ષિપ્તરૂપેણ સ્વલ્પપરિશ્રમેણ સુગમરીત્યા ચાસ્ય પ્રયોગઃ સર્વૈર્જનૈઃ કર્તું શક્યતે । અસ્મિન્ પ્રયોગે ચન્દ્રસૂર્યસ્વરયોઃ (વામદક્ષિણસ્વરયોઃ) પરિજ્ઞાનમાત્રેણ ફલાદેશં કર્તું શક્યત ઇતિ શમ્।

ડૉ૦ નાગેન્દ્રપાણ્ડેયઃ
પ્રાધ્યાપકઃ, જ્યોતિષવિભાગે,
સમ્પૂર્ણાનન્દસંસ્કૃતવિશ્વવિદ્યાલયસ્ય, વારાણસી

Proofread by Meera Iyer

*Svarashastra Parichayah*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*